# shrIdattAparAdhakShamApaNastotram

# શ્રીદત્તાપરાધક્ષમાપણસ્તોત્રમ્

## Document Information

Text title : dattAparAdhakShamApaNastotram

File name : dattaaparaadhakshamaa.itx

Category : aparAdhakShamA, deities_misc, dattAtreya, vAsudevAnanda-sarasvatI, aShTaka

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI

Transliterated by : WebD

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : January 18, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# શ્રીદત્તાપરાધક્ષમાપણસ્તોત્રમ્

દત્તાત્રેયં ત્વાં નમામિ પ્રસીદ ત્વં સર્વાત્મા સર્વકર્તા ન વેદ ।
કોઽપ્યન્તં તે સર્વદેવાધિદેવ જ્ઞાતાઽજ્ઞાતાન્મેઽપરાધાન્ ક્ષમસ્વ ॥ ૧॥

ત્વદુદ્ભવત્વાત્વદધીનધીત્વાત્તવમેવ મે વન્દ્ય ઉપાસ્ય આત્મન્ ।
અથાપિ મૌઢ્યાત્ સ્મરણં ન તે મે કૃતં ક્ષમસ્વ પ્રિયકૃન્મહાત્મન્ ॥ ૨॥

ભોગાપવર્ગપ્રદમાર્તબંધું કારુણ્યસિન્ધું પરિહાય બન્ધુમ્ ।
હિતાય ચાઽન્યં પરિમાર્ગયન્તિ હા માદૃશો નષ્ટદૃશો વિમૂઢાઃ ॥ ૩॥

ન મત્સમો યદ્યપિ પાપકર્તા ન ત્વત્સમોઽથાપિ હિ પાપહર્તા ।
ન મત્સમોઽન્યો દયનીય આર્ય ન ત્વત્સમઃ ક્વાપિ દયાલુવર્યઃ ॥ ૪॥

અનાથનાથોઽસિ સુદીનબન્ધો શ્રીશાઽનુકમ્પામૃતપૂર્ણસિન્ધો ।
ત્વત્પાદભક્તિં તવ દાસદાસ્યં ત્વદીયમંત્રાર્થદૃઢૈકનિષ્ઠામ્ ॥ ૫॥

ગુરૂસ્મૃતિં નિર્મલબુદ્ધિમાધિવ્યાધિક્ષયં મે વિજય ચ દેહિ ।
ઇષ્ટાર્થસિદ્ધિં વરલોકવશ્યં ધનાન્નવૃદ્ધિં વરગોસમૃદ્ધિમ્ ॥ ૬॥

પુત્રાદિલબ્ધિં મ ઉદારતાં ચ દેહીશ મે ચાસ્ત્વભય હિ સર્વતઃ ।
બ્રહ્માઽગ્નિભૂમ્યો નમ ઓષધીભ્યો વાચે નમો વાક્પતયે ચ વિષ્ણવે ॥ ૭॥

શાન્તાઽસ્તુ ભૂર્નઃ શિવમન્તરિક્ષ દ્યૌશ્ચાઽભયં નોઽસ્તુ દિશ શિવાશ્ચ ।
આપશ્ચ વિદ્યુત્પરિપાન્તુ દેવાઃ શ સર્વતો મેઽભયમસ્તુ શાન્તિઃ ॥ ૮॥

॥ ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં
દત્તાપરાધક્ષમાપણસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Arvind Kolhatkar akolhatkar at rogers.com

*shrIdattAparAdhakShamApaNastotram*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*